दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-316 | 1 | सितम्बर 11, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् आश्विनकृष्णस्य पञ्चमी
भाद्रपद 26 प्रविष्टांशः मङ्गलमयः भवेत्

2 यूरोपीय-संघेन भारतेन च ब्रुसेल्स्-नगरे आतंकवाद-निरोधाय संयुक्तकार्यदलस्य पञ्चदश उपवेशनस्य आयोजनं कृतम्

3 HPU Shimla - हिमाचलप्रदेशविश्वविद्यालयेन महाविद्यालयेषु प्रवेशस्य तिथिं विस्तारिता

5 हिमालयदिवसस्य अवसरे वृक्षमित्रसमित्या बालकानां मध्ये गोष्ठी आयोजिता

## प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः अध्यक्षतायां आर्थिक कार्य-विषयाणां मन्त्रिमण्डलीय-समित्या नैकाः महत्वपूर्णाः परियोजनाः समनुमताः




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः अध्यक्षतायाम् आर्थिककार्य-विषयाणां मन्त्रिमण्डलीय-समित्या नैकाः महत्वपूर्णाः परियोजनाः समनुमताः। अनया समित्या बिहारे, झारखण्डे, पश्चिमबंगाले च भागलपुर-दुमका-रामपुरहाट रेलखण्डस्य सप्त-सप्तत्युत्तर-एक-शत-किलोमीटर-मितायाः सुदीर्घ-रेल-पट्टिकायाः द्वि-पक्षीय-विस्तारणार्थं हरित-ध्वज-प्रदर्शनपूर्वकं अनुमतिः प्रदत्ता। एतस्यां परियोजनायां प्रायः एकोन-सप्तत्युत्तर-एक-शताधिक-त्रि-सहस्र-कोटिकानि रूप्यकाणि व्ययी भविष्यन्ति। समित्या बक्सर-भागलपुर हाई-स्पीड कॉरिडोर इत्यस्य मकामा-मुंगेर खण्डे, द्वाशीति-किलोमीटर-मितस्य लम्बायमानस्य चतुस्-पतेः ग्रीनफील्ड-राजमार्ग-निर्माणस्य कृते अपि स्वीकृतिः दत्ता अस्ति। अस्य अनुमानितः व्ययः सप्त चत्वारिंशदुत्तर-चतुश्शताधिक-चतुस्सहस्र-मितानि रुप्यकाणि सन्ति।

## भारतं समेत्य रूस-देशात् तैल-क्रयण-दरेषु देशेषु, प्रतिशतं शत-मितं शुल्कं प्रवर्तनीयम् - डोनाल्ड ट्रम्पः




**हिमसंस्कृतवार्ताः** - अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः यूरोपीय-संघम् अवोचत् यत् भारतं समेत्य रूस-देशात् तैल-क्रयण-दरेषु देशेषु, प्रतिशतं शत-मितं शुल्कं प्रवर्तनीयम्। ध्यातव्यम् अस्ति यत् अमेरिकादेशेन पूर्वमेव प्रतिशतं पञ्चाशन्मितं टैरिफ शुल्कं प्रवर्तितं वर्तते, सम्प्रति तेन यूरोपीय-संघः अपि भारते व्यापक-शुल्क-प्रवर्तनार्थं प्रोक्तः अस्ति, यद्धि यूक्रेन-युद्धं समापयितुं मास्को मध्ये आपीड-प्रदानार्थं तथाकथित-सामूहिक प्रयासस्य अङ्गम् अस्ति। राष्ट्रपतिना वाशिंगटन-मध्ये अमेरिकायाः यूरोपीय संघस्य च वरिष्ठाधिकारिभिः साकम् एकमुपवेशनम् आकारितं यत्र एषः प्रस्तावः उपस्थापितः। अमुना भणितं यद् अमेरिका अपि एतत् कर्तुं तत्परम् अस्ति परम् अमेरिका तदैव एतदाचरिष्यति यदा यूरोपीय संघः अपि आचरिष्यति।

## नेपालसैन्यबलेन देशे विवर्धमानाम् अशान्तिं निध्याय सञ्चाररोधादेशः प्रवर्त्तितः



**हिमसंस्कृतवार्ताः** - नेपाले निरन्तरं अशान्तिः अस्थैर्यं च समेधतेतराम्। नेपाल सैन्यबलेन गतसायं पञ्च-वादनं यावत् तत्र निषेधाज्ञा प्रवर्तितः आसीत् यद्धि विवर्ध्य सम्प्रति समस्ते देशे सञ्चार-रोधादेशः कल्पितः अस्ति। नेपाल-सैन्यबलेन प्रतिपाद्यते यद् एषः पदक्षेपः विरोध-प्रदर्शनकारिभिः दुरापादितानामग्निकण्डानाम्, लुण्ठन-कर्मणां, हिंसक गतिविधीनां च नियन्त्रणार्थम् उत्थापितः अस्ति। अत्रान्तरे नेपालस्य त्रिभुवन अन्ताराष्ट्रिय-विमान-पत्तनमेव निरन्तरं सोमवासरतः पिहितम् अस्ति। ध्येयमस्ति यद् भारत-सर्वकारेण भारतीय-नागरिकाः नेपालस्य यात्रां न कर्तुं परामृष्टाः सन्ति। ये च पूर्वतः एव तत्र नेपाले सन्ति ते सम्पृष्टाः सन्ति यत् ते निजावासेभ्यः बहिर् नैव गच्छेयुः अथ च स्थानीय-प्रशासनस्य भारतीय-दूतावासस्य च परामर्शानां निर्देशानां च अनुपालनं कुर्युः। भारतीय-दूतावासेन आपात्कालिक-सहायतार्थं दूरभाषसंख्यापि प्रख्यापिता अस्ति। भारतसर्वकारेण भारतीय-नागरिकाः परामृष्टाः यत् ते यावत् स्थितिं सामान्यतां नैव गच्छति तावत् नेपालयात्राम् न कुर्युः।

## सुभाषितम्

**कार्यार्थी भजते लोकं,
यावत्कार्यं न सिद्धति।
उत्तीर्णे च परे पारे,
नौकायां किं प्रयोजनम्॥**

भावार्थः- जिस तरह नदी पार करने के बाद लोग नाव को भूल जाते हैं ठीक उसी तरह से लोग अपने काम पूरा होने तक दूसरों की प्रशंसा करते हैं और काम पूरा हो जाने के बाद दूसरे व्यक्ति को भूल जाते हैं।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्तयर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## उत्तराखण्ड-चतुर्धामयात्रायाः द्वितीयः चरणः प्रारम्भः जातः

हिमसंस्कृतवार्ताः - उत्तराखण्डे चतुर्धामयात्रायाः द्वितीयः चरणः प्रारम्भः जातः। बदरीनाथ, केदारनाथ, गंगोत्री, यमुनोत्री चेति धामसु श्रद्धालूनां बृहती संख्या प्राप्नोति । ऋतोः प्रातिकूल्य-कारणेन मध्ये एषा यात्रा बाधिता आसीत्। हेलीकॉप्टर इति उदग्रविमान-यात्रा-सेवाः सितम्बर-पञ्चदशी-तः पुनः प्रारप्स्यन्ते। अनया वैमानिक-सेवया वरिष्ठाः अस्वस्थाः अशक्ताश्च तीर्थयात्रिणः सविशेषं लाभान्विताः भविष्यन्ति।

# यूरोपीय-संघेन भारतेन च ब्रुसेल्स्-नगरे आतंकवाद-निरोधाय संयुक्तकार्यदलस्य पञ्चदश उपवेशनस्य आयोजनं कृतम्


सांकेतिकं चित्रम्

हिमसंस्कृतवार्ताः - यूरोपीय-संघेन भारतेन च ब्रुसेल्स्-नगरे आतंकवाद-निरोधाय संयुक्तकार्यदलस्य पञ्चदश उपवेशनस्य आयोजनं कृतम् । अस्य संवादस्य सहाध्यक्षतां यूरोपीय-विदेश-क्रियासेवायां सुरक्षा-नीतिनिदेशकः मैसीज स्टेडजेक एवं विदेशमन्त्रालये संयुक्तसचिवः के.डी. देवलः च कृतवन्तौ। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् उभयपक्षौ अप्रैलमासस्य द्वाविंशे दिनाङ्के पहलगाम-क्षेत्रे दरापन्नम् आतङ्कवाद्याक्रमणं निन्दितवन्तौ। यूरोपीय-सङ्घेन निर्दोष-नागरिकाणां हननविषये भारतं प्रति स्वीया संवेदना पुनः प्रकटिता। उभयपक्षाभ्याम् सर्वरूपेषु आतङ्कवादस्य कठोर निन्दा कृता। तैः अङ्गीकृतं यत् आतङ्कवादः वैश्विक समस्या वर्तते सहैव अस्य निराकरणाय दृढपदक्षेपाणां आवश्यकतास्ति ।

# भारत-अमेरिकादेशयोः सम्बन्धः घनिष्ठः - प्रधानमन्त्री नरेन्द्रमोदी


सांकेतिकं चित्रम्

**हिमसंस्कृतवार्ताः,नवदेहली।** प्रधानमन्त्रिणा श्रीमोदिना प्रोक्तं यत् भारतामेरिकादेशौ स्वाभाविकतया घनिष्ठ-मित्र-देशौ वर्तेते। असौ अवोचत् यत् अहं प्रत्यैमि यत् अस्माकं सम्भाषणोपवेशनम् उभयोः साहमत्यस्य असीम-सम्भावनानां मार्ग प्रशस्ती करिष्यति। प्रधानमन्त्रिणा मोदिना डोनाल्ड ट्रम्पस्य सञ्जालीयः लेखः विनिमयीकृत्य साम्रेडितं यत् अस्माकं प्रयत्नः शीघ्रातिशीघ्रं चर्चा-समाधाने वर्तते। मोदिना प्रोक्तं यत् अहमपि राष्ट्रपतिना ट्रम्पेण समं सम्भाषणार्थम् उत्सुकोऽस्मि । वयम् उभयोः देशयोः कृते समुज्ज्वल-समृद्ध-भविष्यं सुनिश्चेतुं सम्भूय कार्यम् आचरिष्यामः। ध्येयम् अस्ति यत् डोनाल्ड ट्रम्पेण एकस्मिन् सञ्जालीये लेखे भारतं महत्त्वपूर्ण प्रतिपादयता श्रीमोदिना साकं सम्भाषणार्थं निजा उत्सुकतापि प्रकटिता आसीत्। तस्मिन्नेव लेखे श्रीमोदिनः प्रत्युत्तरम् आगतम् अस्ति। प्रधानमन्त्री मोदी प्रत्यपादयत् यत् डोनाल्ड ट्रम्पेण साकं सम्भाषणम् आचरितुम् सोऽपि उत्सुको वर्तते। प्रधानमन्त्री एतदपि न्यगदत् यत् व्यापारिक-साहमत्य विषये कार्यं चलति परिणामश्च शोभनः भविष्यति ।

# नेपालदेशे हिंसात्मकं विरोधाचरणं हृदय-विदारकं वर्तते - प्रधानमन्त्री नरेन्द्रमोदी

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना नेपालस्य घटनाक्रममालक्ष्य सुरक्षाप्रकरणानां मन्त्रिमण्डल-समितेरुपवेशनस्य अध्यक्षता कृता। सामाजिकान्तर्जालीय-सन्देशे तेन प्रोक्तम् यत् नेपालदेशे हिंसात्मकं विरोधाचरणं हृदयविदारकं वर्तते। अस्मिन् अवसरे प्रधानमन्त्री श्रीनरेन्द्रमोदी नेपालस्य स्थिति-विषये गम्भीरां चिन्ताम् अभिव्यक्तवान्। असौ प्रावोचत् यत् नेपाले हिंस्राचरणम् दुःखदायकं वर्तते तत्रत्या स्थिरता, शान्तिः



समृद्धिः च अत्यन्तमेव आवश्यकी वर्तते। प्रधानमन्त्रिणा मोदिना नेपालस्य जनता शांति-सन्धारणार्थं निवेदिताः सन्ति।

# उत्तराखण्डेन साकं संलग्ने भारत-नेपाल सीमनि सुरक्षाप्रबन्धाः समेधिता सुदृढीकताश्च सन्ति



**हिमसंस्कृतवार्ताः** - प्रतिवेशि-देशे नेपाले जाजायमानम् अशान्तिं राजनीतिकीम् अस्थिरतां च ध्यात्वा, उत्तराखण्डेन साकं संलग्ने भारत-नेपाल सीमनि सुरक्षाप्रबन्धाः समेधिता सुदृढीकताश्च सन्ति। सीमवर्ति क्षेत्रेषु एस.एस.बी. इति सीमा-सुरक्षा-बलस्य, आरक्षि बलस्य च संयुक्तरूपेण गहन-निरीक्षणं अन्वेषणाभियानं च प्रचाल्यते। चम्पावतस्य जनपदाधीशः मनीष कुमारः प्रावोचत् यत् तत्र सीमनि सुरक्षा- प्रबन्धाः सुतरां सुदृढीकृताः वर्तन्ते

# असमसर्वकारः मुख्यमन्त्री-आश्रयकोषे ५ कोटिरूप्यकाणां योगदानम् अददत्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे अस्मिन् मानसूनकाले प्रचण्डवृष्ट्या क्षतिं दृष्ट्वा असमसर्वकारस्य पक्षतः विद्युत्, कौशल, जीविका एवं उद्यमिता मन्त्री प्रशांतफुकनः इत्यनेन मुख्यमन्त्री-आश्रयकोषाय मुख्यमन्त्रिणे सुखविन्दरसिंहसुखूवर्याय ५ कोटिरूप्यकाणां सहायताराशिः चेकमाध्यमेन नवदिल्लीनगरे प्रदत्ता। एतस्य अतिरिक्तं हिन्दुस्तान- यूनिलीवर-सीमितस्य वरिष्ठप्रबन्धकः विधि एवं निगमकार्याणि राहुल बग्गा अपि मुख्यमन्त्री-आश्रयकोषाय मुख्यमन्त्रिणे ५० लक्षरूप्यकाणां सहायताराशिः चेकमाध्यमेन प्रदत्तवान्।हिमाचलप्रदेश-राज्यपरिवहननिदेशकः बलदेवठाकुरः मुख्यमन्त्री- आश्रयकोषाय एकलक्षरूप्यकाणां सहयोगराशिः चेकद्वारा मुख्यमन्त्रिणे अर्पितवान्। अस्य योगदानस्य कृते सर्वेषां दातॄणां प्रति कृतज्ञतां प्रकटयन् मुख्यमन्त्री अवदत् यत् अस्मिन् संकटकाले विभिन्नराज्यानां, संस्थानां, परोपकारीणां च सर्वकाराः मुख्यमन्त्री- आश्रयकोषाय उदारदानं कुर्वन्ति। सः अवदत् यत् एतत् योगदानं आपदाग्रस्तपरिवाराणाम् आश्रयाय पुनर्वासं च प्रदातुं साहाय्यं करिष्यति।

# जलशक्तिविभागस्य ९२५.८५ कोटिरुप्यकाणां क्षतिः- मुकेश अग्निहोत्री

हिमसंस्कृतवार्ताः- शिमला।
हिमाचले प्राकृतिक-आपदाकारणात् बाधितानां १२,२८१ जलापूर्तियोजनानां मध्ये १२,००७ योजनानां पुनर्स्थापनं कृतम्। राज्ये जलापूर्तियोजनासु ९२५.८५ कोटिरूप्यकाणां हानिः अभवत्।



उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन उक्तं यत् जलशक्तिविभागस्य कर्मचारिणः प्रभावितक्षेत्रेषु सामान्यजनानाम् कृते आश्रयप्रदानार्थं क्षेत्रे दिवारात्रौ कार्यं कुर्वन्ति तथा च मूलभूतसुविधानां पुनर्स्थापनं कर्तुं प्रवृत्ताः सन्ति। राज्ये कुलम् १२,२८१ जलापूर्तियोजनाः अत्यधिकवृष्ट्या प्रभाविताः अभवन्, परन्तु जनानां सुविधायै विभागेन तत्क्षणमेव एतासु १२,००७ योजनाः कार्यान्विताः। उपमुख्यमन्त्री उक्तवान् यत् जलप्रदायस्य, सीवरेजयोजनानां च पुनर्स्थापनं सर्वकारस्य प्राथमिकता अस्ति। पुनर्स्थापनकार्य्ये कोऽपि प्रमादः न कर्तव्यः इति विभागाय निर्देशाः दत्ताः इति सः अवदत्। सर्वकारः जनसामान्यं प्रति मूलभूतसुविधाः प्रदातुं कार्यं कुर्वन् अस्ति तथा च शीघ्रमेव प्रभाविताः सर्वाः योजनाः स्थायिरूपेण पुनः स्थापिताः भविष्यन्ति।

# राजकीय- संस्कृतमहाविद्यालये, फागली इत्यत्र अखिलभारतीयविद्यार्थिपरिषदः नव्यकार्यकारिणीगठनम्




**हिमसंस्कृतवार्ताः-** फागली (शिमला)राजकीयसंस्कृतमहाविद्यालये, फागली इत्यत्र अखिलभारतीयविद्यार्थिपरिषदः (एबीवीपी) नव्यकार्यकारिणीगठनं सम्पन्नम्। परिषदा आयोजितेऽस्मिन् महत्वपूर्णे अधिवेशने महाविद्यालयस्य अनेके छात्राः, कार्यकर्तारः च सहभागिनः अभवन्। अस्मिन् अधिवेशने पूर्व इकाई अध्यक्षः चेतन्यशर्मा, पूर्व इकाईसचिवः, मुख्यातिथिरूपेण शिमलाजिलासंघटनमन्त्री प्रदीपठाकुरः, चुनावाधिकारीरूपेण प्रदेशकार्यकारिणीसदस्यः अंशुलशर्मा च उपस्थिताः आसन्। अखिलभारतीयविद्यार्थिपरिषद् राष्ट्रस्य महत्तमः छात्रसंगठनः अस्ति, यः सर्वदा छात्राणां सर्वाङ्गीणविकासाय, शिक्षायाः गुणवत्तायै, राष्ट्रनिष्ठायै च कार्यरतः अस्ति। तस्यैव परम्परायाः संवर्धनाय फागली संस्कृतमहाविद्यालय– इकाईद्वारा नवसत्राय कार्यकारिणीगठनं कृतम्।

वरिष्ठकार्यकर्तारः अस्मिन् अवसरे परिषदः गौरवमयम् इतिहासम् आलोक्य छात्रहितेषु कृतान् संघर्षान् उल्लिख्य सन्देशम् अददुः।

नव्यकार्यकारिणी पारदर्शितया गृहीता। घोषिताः नूतनाः पदाधिकारीणः यथानिर्दिष्टाः-

इकाई–अध्यक्षः - सत्यमशर्मा
इकाई–उपाध्यक्षाः - अनमोलः, शगुनः, प्रशान्तः, सावनः
इकाई–सचिवः - तमन्ना सकलानी
सह–सचिवाः - पारुलः, पवनः, राहुलः, हर्षिता
सोशलमीडियाप्रमुखः - आकर्षशर्मा
मीडियाप्रमुखः - पंकजः
राष्ट्रीयकलामञ्चप्रमुखा- कामाक्षी
खेलोभारतप्रमुखः - चिरागः
SFS प्रमुखः - आदित्यः
SFD प्रमुखः - अंशुलः

अन्येषु विभागेषु अपि योग्याः कार्यकर्तारः दायित्वानि स्वीकृतवन्तः। नव–निर्वाचिताः कार्यकर्तारः संगठनस्य आदर्शान् छात्रहितांश्च अग्रे स्थापयिष्यन्ति इति संकल्पं कृतवन्तः। ते उक्तवन्तः यत् शिक्षायाम् आपन्नाः समस्याः निवारयिष्यन्ति, महाविद्यालये आवश्यकाः सुविधाः साधयिष्यन्ति, सांस्कृतिकशैक्षिकक्रियाः च संवर्धयिष्यन्ति।

अखिलभारतीयविद्यार्थिपरिषद् सदा एतत् मन्तव्यम् आह- छात्राः केवलं स्वस्य भविष्यस्य निर्माता न सन्ति, अपितु राष्ट्रस्य अपि भविष्यनिर्मातारः एव। अतः संगठनं नेतृत्वम्, राष्ट्रनिष्ठाम्, सामाजिकं दायित्वं च छात्रेभ्यः प्रददाति।

फागली संस्कृत- महाविद्यालयस्य नवकार्यकारिणी अपि तस्याः परम्परायाः अंशः अस्ति, यत्र युवानः नेतृत्वाय अवसरं लभन्ति, ये च भविष्ये उत्तरदायी नागरिकाः भवन्ति।

जिलासंघटनमन्त्री प्रदीपठाकुरः अवदत्-

“अखिलभारतीयविद्यार्थिपरिषद् १९४९ तमे वर्षे स्थापितः। तदा आरभ्य अयं संगठनः देशस्य सर्वत्र विश्वविद्यालयेषु महाविद्यालयेषु च छात्राणां अधिकाररक्षणे, शिक्षायाः गुणवृद्धौ, राष्ट्रभक्तेः जागरणे च तत्परः अस्ति। फागली संस्कृतमहाविद्यालये नव्यकार्यकारिणीगठनं तस्य परम्परायाः विस्तारः एव।”

अतः राजकीयसंस्कृतमहाविद्यालये फागली अखिलभारतीयविद्यार्थिपरिषदः नूतनकार्यकारिणीगठनं केवलम् औपचारिकं न, अपि तु छात्राणां भविष्यनिर्देशकम् निर्णायकं च चरणम् अस्ति। परिषद्सङ्घे छात्राः न केवलं स्वविकासे, अपि तु समाजराष्ट्रयोः सेवायाम् अपि सक्रियं योगदानं ददति। आशा क्रियते यत् एषा कार्यकारिणी स्वकर्तव्यपरायणतया छात्रसमस्याः निवारयिष्यति, शिक्षायाः गुणवत्तावृद्धिं साधयिष्यति, राष्ट्रहिताय च निरन्तरं कार्यं करिष्यति।

# HPU Shimla - हिमाचलप्रदेशविश्वविद्यालये न महाविद्यालयेषु प्रवेशस्य तिथिं विस्तारिता



हिमसंस्कृतवार्ताः - शिमला ।हिमाचलप्रदेशविश्वविद्यालयेन सम्बद्धेषु महाविद्यालयेषु प्रचलितेषु स्नातकपाठ्यक्रमेषु प्रवेशं ग्रहीतुं अन्यः अवसरः अस्ति। प्रवेशात् वंचितानां छात्राणां महाविद्यालयेषु प्रवेशस्य अन्तिमतिथिः अधुना २० सेप्टेम्बरपर्यन्तं विस्तारिता अस्ति। विभिन्नमहाविद्यालयानाम् प्राचार्याणां, प्रतिनिधिनां, छात्रसङ्घटनानां च प्रवेशार्थं ऑनलाइन-पटलम् उद्घाटयितुं आग्रहं दृष्ट्वा कुलपतिः प्रोमहावीरसिंहः स्नातककक्ष्यासु प्राकशास्त्रीकक्षायां च प्रवेशस्य तिथिः विस्तारयितुं स्वीकृतिः प्रदत्ता। तत्सह विश्वविद्यालयेन बुधवासरे अधिसूचना अपि प्रकाशिता। अधिसूचनानुसारं हिमाचलप्रदेशविश्वविद्यालयसम्बद्धेषु सर्वकारीयनिजीमहाविद्यालयेषु स्नातकस्तरीयवर्गेषु प्रवेशः अधुना २० सितम्बरपर्यन्तं ग्रहीतुं शक्यते। एतेन सह महाविद्यालयेषु निर्धारितमार्गदर्शिकानुसारं प्रवेशः दातव्यः इति मार्गदर्शिकाः प्रदत्ताः सन्ति।

## स्नातकानुपूरकपरीक्षायाः प्रपत्रपूरणस्य तिथिः १४ सितम्बरपर्यन्तं विस्तारिता

हिमाचलप्रदेशविश्वविद्यालयेन स्नातकस्य प्रथमद्वितीयतृतीयवर्षस्य (बीए, बीएससी, बीकॉम तथा शास्त्री) अनुपूरकपरीक्षाः तथा च दूरस्थशिक्षाकेन्द्रस्य जनवरीसत्रस्य वार्षिकपरीक्षा अर्थात् आईसीडीओएल इत्यस्य वार्षिकपरीक्षां दृष्ट्वा परीक्षाप्रपत्रं पूरयितुं तिथिः १४ सितम्बरपर्यन्तं विस्तारिता अस्ति। तदनन्तरं विश्वविद्यालयस्य नियमानुसारं विलम्बशुल्कं गृहीतं भविष्यति। पूर्वं एषा तिथिः १० सेप्टेम्बर् यावत् निर्धारिता आसीत् । बुधवासरे विश्वविद्यालयस्य परीक्षानियन्त्रकेन प्रो.श्यामलाल कौशलेन अस्मिन् विषये अधिसूचना कृता।

# पञ्जाबविश्वविद्यालयस्य संस्कृतविभागः संस्कृतभारती-पञ्जाबप्रान्तश्च इत्यनयोः संयुक्ततत्त्वावधानेन दशदिनात्मिका संस्कृतसम्भाषणकार्यशाला



**हिमसंस्कृतवार्ताः।** पञ्जाबविश्वविद्यालयस्य संस्कृतविभागः संस्कृतभारती-पञ्जाबप्रान्तश्च इत्यनयोः संयुक्ततत्त्वावधानेन दशदिनात्मिका संस्कृतसम्भाषणकार्यशाला आयोजिता कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन, वैदिकमङ्गलाचरणेन च जातः । विभागाध्यक्षया डा० सुनीतावर्यया सर्वेषां अतिथीनां प्रतिभागिनां च औपचारिकरूपेण स्वागतं विहितम्। तया उक्तं यत् संस्कृतभाषायाः संवर्धनं एवञ्च पोषणम् अस्माकमेव दायित्वमस्ति, संस्कृतभाषया एव संस्काराः उपजायन्ते अनेनैव संस्कृत्याः अपि संरक्षणं भवति। उद्घाटनसत्रे मुख्यातिथिरूपेण संस्कृतभारत्याः उत्तरक्षेत्रसंगठनमन्त्री श्रीमान् नरेन्द्रवर्यः उपस्थिताः आसन् तेन स्वोद्बोधने उक्तं यत् - संस्कृतभाषा अस्माकं गौरवपूर्णा भाषा अस्ति सः अतीतम् उल्लिख्य, वर्तमानकाले संस्कृतभाषायाः आवश्यकता-प्रासङ्गिकतां च अतीव सरलतया स्पष्टतया च निरूपितवान्। कार्यक्रमस्य संचालनं विभागस्य सहायकाचार्येण डॉ. तोमीर शर्मणा कृतम्। अस्मिन् अवसरे विभागस्य प्राध्यापकः प्रो. वीरेंद्रकुमार-अलंकारवर्यः सर्वान् सम्बोधितवान्। महोदयः उक्तवान् यत् —विश्वस्य प्रथमं काव्यम्, कथा, नाटकं, नाट्यशास्त्रं च संस्कृतभाषायामेव विरचितम् अस्ति। अस्याः कार्यशालायाः प्रमुखमुद्देश्यमस्ति—संस्कृतभाषया व्यवहारः,प्रसारः, युवसु संस्कृतविषये जागरणं, भारतीय-संस्कृतेः संरक्षणं संवर्धनं च। अस्यां सम्भाषणकार्यशालायां मुख्यशिक्षिकारूपेण विस्तारिका रजनी पाठिष्यति। अस्मिन् अवसरे सनातनधर्मसंस्कृतमहाविद्यालयात् त्रयोविंशतिः संख्यकाः छात्राः समुपस्थिताः आसन्, विश्वविद्यालयस्य विविधानांविभागानां शिक्षकाः, संस्कृतप्रेमिणः, छात्राः, अध्यापकाः, समाजसेविनश्च उपस्थिताः आसन् । कार्यशालायाः प्रमुखोद्देश्यं न केवलं संस्कृतशिक्षणम् अपितु संस्कृतभाषां जीवने व्यवहारिकभाषारूपेण प्रतिष्ठापयितुमस्ति।

# HP Education Department - सर्वकारीविद्यालयानाम् सीबीएसई-मान्यतायै प्रारूपः सज्जः, पृथक् शिक्षकसंवर्गस्य निर्माणं भविष्यति




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
हिमाचलप्रदेशस्य काङ्ग्रेससर्वकारः शिक्षाक्षेत्रे बृहत्तमं व्यवस्थापरिवर्तनं कर्तुं गच्छति। हिमाचलप्रदेशविद्यालयीयशिक्षामण्डलेन सह सम्बद्धानां राजकीयविद्यालयानाम् केन्द्रीयमाध्यमिकशिक्षामण्डलस्य (सीबीएसई) सम्बद्धता प्रदत्ता भविष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः १५ अगस्तदिनाङ्के एतस्य घोषणां कृतवान् आसीत्।

प्रथमचरणस्य २०० विद्यालयान् सीबीएसई-सङ्गतिं कर्तुं सः घोषितवान् आसीत्। विद्यालयीयशिक्षाविभागेन मुख्यमन्त्रिणः घोषणायाः कार्यान्वयनम् आरब्धम् अस्ति। विभागेन राज्यस्य सर्वेभ्यः एतादृशानां विद्यालयानां सूचीं याचिता आसीत्, ये तस्य सम्बद्धाः भवेयुः। २२९ विद्यालयानां अस्थायीसूची निर्मिता अस्ति। अधुना तस्य क्रमः क्रियते।

सूत्रानुसारं २०२६-२७ तमस्य वर्षस्य शैक्षणिकसत्रात् प्रथमचरणस्य सीबीएसईद्वारा १०० विद्यालयाः मान्यतां प्राप्तुं प्रयत्नाः क्रियन्ते। एतेषु विद्यालयेषु सीबीएसई बोर्डः इति भविष्यति, परन्तु पूर्ववत् राज्यसर्वकारेण विद्यालयाः चालिताः भविष्यन्ति।

## शिक्षक-अशिक्षकाणां पृथक् संवर्गः सज्जीकृतः भविष्यति

अस्य कृते अध्यापकानाम् अशिक्षकाणां च पृथक् संवर्गः सज्जः भविष्यति। एते विद्यालयाः सम्पूर्णतया आङ्ग्लमाध्यमेन चालयिष्यन्ते। एतादृश्यां परिस्थितौ अस्मिन् संवर्गे ये शिक्षकाः आगच्छन्ति तेषां चयनं भविष्यति। तेषां स्थानान्तरणम् अपि केवलं सीबीएसई विद्यालयेषु एव भविष्यति। अधुना यावत् सर्वकारीयविद्यालयेषु निःशुल्कशिक्षा प्रदत्ता अस्ति। सीबीएसई इत्यस्य सङ्घटनानन्तरं तस्य शुल्कं गृह्यते वा इति अद्यापि निर्णयः न कृतः। परन्तु अस्मिन् अपि बालकानां शुल्कं न गृहीतं भविष्यति इति विश्वासः अस्ति। प्रवेशार्थं विभागः पृथक् नियमाः निर्मास्यति। शिक्षासचिवः राकेशकंवरः बुधवासरे सचिवालये विभागीयाधिकारिभिः सह गोष्ठीं कृतवान्। अस्मिन् विद्यालयेभ्यः सीबीएसई-मान्यतायाः विषये विस्तृता चर्चा अभवत्।

## किमस्ति कारणम् ?

- सीबीएसई-निर्माणस्य पृष्ठतः एषः एव सर्वकारस्य तर्कः - सर्वकारीयविद्यालयेषु छात्राणां संख्या प्रतिवर्षं न्यूनीभवति, एतत् स्थगितम् भविष्यति।
- बालकान् निजीविद्यालयेषु प्रेषयितुं केवलं सीबीएसई बोर्ड इत्यस्य एव इति धारणा गमिष्यति।
- सर्वकारीविद्यालयव्यवस्थां प्रतिस्पर्धात्मकं गुणात्मकं च कर्तुं सीबीएसई-व्यवस्था स्वीक्रियते।
- सीबीएसई-सम्बद्धतां प्रति स्थानान्तरणं कृत्वा राज्यस्य सर्वकारीयविद्यालयानाम् छात्राः देशे सर्वत्र स्वसमवयस्कैः सह समानावकाशान् प्राप्स्यन्ति।
- छात्राणां शैक्षणिकप्रतिस्पर्धा वर्धते, उच्चशिक्षायाः व्यावसायिकवृत्तेः च उत्तमाः अवसराः उद्घाटिताः भविष्यन्ति।

## विभागेन प्रारूपं निर्मितम्

२०२६-२७ वर्षात् सर्वकारीयविद्यालयेषु केन्द्रीयमाध्यमिकशिक्षामण्डलाधारितपाठ्यक्रमस्य आरम्भार्थं सीबीएसईतः सम्बद्धतां प्राप्तुं च मार्गचित्रं निर्मितम् अस्ति। अस्थायीसूचौ समाविष्टेषु २२९ सर्वकारीविद्यालयेषु ४७ पीएम श्री तथा उत्कृष्टविद्यालयसहिताः १५० अन्ये विद्यालयाः सन्ति।

## अस्माकं पीटीआर उत्तमः, परन्तु मूलभूतसुविधाः प्रदातव्याः भविष्यन्ति

सीबीएसईतः सम्बद्धतां प्राप्तुं मानकं कठोरम् अस्ति। छात्रशिक्षकानुपातः प्राथमिकस्य १:३०, उच्चतरस्य च १:४० भवति। हिमाचलस्य पीटीआर अनुपातः १:१२ तः १:२० यावत् अस्ति। यद् देशे सर्वोत्तमम् इति मन्यते। परन्तु मूलभूतसुविधानां दृष्ट्या वयं बहुषु स्थानेषु पृष्ठे स्म। प्रत्येकं विद्यालये सूचनाप्रौद्योगिकीप्रयोगशाला, विज्ञानप्रयोगशाला, क्रीडाङ्गणं, व्यावसायिकशिक्षकं, विशेषशिक्षकं च आवश्यकम्। तेषां अभावः अस्ति। विभागः जनपदस्य विद्यालयान्, खण्डमुख्यालयस्य विद्यालयान् च समावेशयिष्यति यतोहि तेषु सुविधाः दूरस्थक्षेत्रेषु विद्यालयानाम् अपेक्षया उत्तमाः सन्ति। विभागस्य तर्कः अस्ति यत् येषु विद्यालयेषु छात्राः अधिकाः सन्ति, तेषु सीबीएसई-मान्यता दातव्या। सीबीएसई-सम्बद्धतायै प्रस्तावितानां विद्यालयानां पञ्जीकरण-निरीक्षण-आवश्यकशुल्क-आदिरूपेण प्रतिविद्यालयं ७० सहस्ररुप्यकाधिकं राशिः आवश्यकी भवति। एतस्य अतिरिक्तं राज्यसर्वकारेण लघुपुनर्स्थापनस्य, नवीनीकरणस्य, परिवर्तनस्य च कार्यस्य बजटस्य व्यवस्थापनं कर्तव्यं भविष्यति तथा च सीबीएसई-उपनियमानाम् अनुसारं आधारभूतसंरचनात्मकानां आवश्यकतानां पूर्तिः कर्तव्या भविष्यति।

## विभागेन कृताः सज्जताः

> आधारभूतसंरचना मानचित्रणं प्रारम्भिकचरणं च १२ अगस्ततः ३० सितम्बरपर्यन्तं

> अक्टोबर् १ दिनाङ्कात् ३१ दिनाङ्कपर्यन्तं आनलाइन आवेदनपत्राणि पञ्जीकृत्य प्रधानाचार्यैः पूरयिष्यन्ते।

> १ नवम्बरतः ३१ दिसम्बरपर्यन्तं सीबीएसईद्वारा आवेदनानां निरीक्षणार्थं ज्ञापनपत्रस्य निरीक्षणकार्यक्रमस्य च सूचनायै निर्धारिता अस्ति।

> १ तः ३१ जनवरी पर्यन्तं सीबीएसई इत्यस्य निरीक्षणम्/निरीक्षणसमितिः भ्रमणं कृत्वा निरीक्षणप्रतिवेदनं निर्मास्यति।

> 1 तः 28 फरवरी पर्यन्तं सीबीएसई द्वारा सम्बद्धता प्राप्ता भविष्यति।

## लद्दाखस्य भ्रमणकाले एषः विचारः आगतः

अधुनैव शिक्षाविभागस्य दलं लद्दाखस्य भ्रमणं कृतवान्। लद्दाखस्य विद्यालयाः पूर्वं जम्मू-कश्मीर-मण्डलस्य अधीनाः आसन्। केन्द्रशासितप्रदेशः भूत्वा तत्रत्याः ८०० विद्यालयाः सीबीएसई-अन्तर्गतं आनीताः। यदा तेषां जम्मू-कश्मीर-बोर्ड इत्यत्र स्थातुं विकल्पः अपि आसीत्। विभागेन तत्रत्यैः अधिकारिभिः सह वार्तालापः कृतः तदा तत्र छात्राणां संख्या वर्धिता इति ज्ञातम्। एतदतिरिक्तं पूर्वोत्तरराज्ये अपि एतादृशं प्रतिमानं स्वीकृतम् अस्ति, विभागस्य दलं निरीक्षणार्थं अपि तत्र गतम्।।

## सीबीएसई-इत्यस्य कृते एतद् आवश्यकम्

१. प्रतिछात्रं १ वर्गमीटर् स्थानं कृत्वा ४० छात्राधिकाः न।
२. पर्याप्तपुस्तकानि अङ्कीयसम्पद्भिः च युक्तः उत्तमः पुस्तकालयः।
३. भौतिकशास्त्रं, रसायनशास्त्रं, जीवविज्ञानं तथा कम्प्यूटर इत्येतेषां कृते अनिवार्यप्रयोगशालाः।
४. कक्षायाः, कर्मचारिणां च कृते पृथक्, स्वच्छाः शौचालयाः प्रक्षालनागाराः वा।
५. प्रत्येकं तलस्य पेयजलस्य व्यवस्था।

२२ वर्षेषु ५ लक्षं न्यूनाः छात्राः, १२०० विद्यालयाः पिहिताः अभवन्
हिमाचलस्य सर्वकारीयविद्यालयेषु छात्राणां संख्या निरन्तरं न्यूनीभवति। २००३ तमे वर्षे प्रथमश्रेण्यां १,४७,०४५ छात्राः नामाङ्किताः आसन् यत्र अस्मिन् वर्षे एषा संख्या ९७४२७ यावत् न्यूनीकृता अस्ति विभागस्य अनुसारं २००३ तमे वर्षे सर्वकारीयविद्यालयेषु ९,७१,३०३ छात्राः पञ्जीकृताः आसन् वर्तमानवर्षे प्रथमकक्षातः अष्टमीपर्यन्तं केवलं ४,२९,०७० छात्राः सन्ति, स्थितिः एतादृशी अस्ति यत् विद्यालयानां विलयः कर्तव्यः भवति। राज्ये सार्धद्वयवर्षेषु १२०० विद्यालयाः पिहिताः विलीनाः च अभवन्। सर्वकारीयविद्यालयेषु छात्राणां संख्या निरन्तरं न्यूनीभवति। विभागस्य अनुसारं प्रतिवर्षं छात्राणां संख्या ५० सहस्राणि न्यूनीभवति। ९ सहस्रं ८४९ कोटिरूप्यकाणि शिक्षायां व्यय्यन्ते।

## विद्यालयीयशिक्षामण्डलस्य अस्तित्वं संकटे, कर्मचारिणः रुष्टाः

सर्वकारीविद्यालयानाम् केन्द्रीयमाध्यमिकशिक्षामण्डले स्थानान्तरणस्य विरुद्धं विरोधाः अपि आरब्धाः सन्ति। हिमाचलप्रदेश-विद्यालयशिक्षामण्डलस्य धर्मशालायाः कर्मचारीसंघस्य राज्याध्यक्षः स्वीयेन सम्पूर्णेन कार्यकारिणीदलेन साकं गतदिवसे बोर्डाध्यक्षस्य डॉ. राजेशः शर्मा इत्यस्य माध्यमेन राज्यसर्वकाराय ज्ञापनपत्रं प्रेषितम्। सः अवदत् यत् एतेन राज्यसर्वकारे अतिरिक्तवित्तीयभारः वर्धते तथापि ग्राम्यछात्राणां कृते अपि काठिन्यं भविष्यति।

सः अवदत् यत् हिमाचलप्रदेशस्य सांस्कृतिकाः, ऐतिहासिकाः, भौगोलिकाः च विशेषताः एचपी बोर्डस्य पाठ्यक्रमे समाविष्टाः सन्ति, यदा तु सीबीएसई इत्यस्य एषः स्थानीयदृष्टिकोणः नास्ति, यस्मात् कारणात् छात्राणां स्थानीयपरिचयः, अवगमनं च दुर्बलं भविष्यति।

## शिक्षामन्त्री किं वदति ?

शिक्षायां गुणात्मक-परिष्कारार्थं विगतसार्धद्विवर्षेषु सर्वकारेण अनेकानि कार्याणि कृतानि। तेषां परिणामाः बहिः आगताः। राष्ट्रिय उपलब्धिसर्वेक्षणस्य प्रभावसर्वेक्षणस्य च प्रतिवेदने हिमाचलम् देशे सर्वोच्चस्थाने अस्ति। सीबीएसई विद्यालयानां स्थितिं दातुं पृष्ठतः अभिप्रायः अस्ति यत् गुणात्मकः परिष्कारः भवति। **-रोहितठाकुरः, शिक्षामंत्री।**

## एषः निर्णयः सज्जतां विना - पूर्वाध्यक्षः शिक्षाबोर्डधर्मशाला

सर्वकारस्य एषः निर्णयः सज्जतारहितः अस्ति। सीबीएसई-प्रतिमानं स्वीकरणात् पूर्वं शिक्षकेभ्यः विशेषप्रशिक्षणं सुविधाः च प्राप्तव्याः। तदनन्तरमेव अस्यां दिशि अग्रे गन्तव्यम्। त्वरया निर्णयं करणं दोषपूर्णम्। **-डॉ. सुरेशसोनी, पूर्वाध्यक्षः, विद्यालयीयशिक्षाबोर्डधर्मशाला।**

# हिमालयदिवसस्य अवसरे वृक्षमित्रसमित्या बालकानां मध्ये गोष्ठी आयोजिता



**हिमसंस्कृतवार्ताः, कुलदीपमेन्दौला।**
उत्तराखण्डस्य मूलभावनानां गहनलेखकः "गिरीशतिवारी गिर्दा"
जनैः आपदाविलेखे स्मृतः । कुलदीपमैन्दोला। गिरीशतिवारी गिर्दा इत्यस्य जनकवेरस्मिन् उत्तराखण्डस्य मूलभावनानां गहनं बोधं पूर्वमेव जातम्। तेन स्वकीयकाव्येन ताः भावाः जनसमाजे समर्प्य जनाः चेतिताः। एषा व्यथा केवलं हिमालयस्य न, किन्तु सर्वस्य निष्क्रियसमाजस्यापि।
"अद्य हिमालयः त्वां आह्वयति, जाग्रहि जाग्रहि हे मम लाल!
मा अनुमन्यस्व अस्माकं न्यासवञ्चनं, मा अनुमन्यस्व अस्माकं विनाशम्।"
हिमालयदिवसस्य स्मरणे, जनान्दोलनेषु स्वकाव्येन चेतयन्तं जनकविं गिरीशतिवारीगिर्दम् सर्वे स्मृतवन्तः। अस्मिन् अवसरे कोटद्वार-वृक्षमित्रसमित्याः सौजन्येन "ई-टेक्नोमाइण्ड" नाम्नि संस्थाने बालकानां मध्ये गोष्ठी आयोजिता।

## आरम्भे बालकैः योगस्य सुन्दरं प्रदर्शनं कृतम्।

मुख्यवक्तृत्वं मितेश्वरानन्दः, सहायक-आयुक्तः (जी.एस्.टी., कोटद्वारम्) इत्यनेन कृतम्। सः बालकान् श्रोतॄंश्च सम्बोध्य हिमालयस्य महत्वं प्रतिपादितवान्। दैनन्दिनजीवने लघ्वभ्यासनां परिवर्तनैः अपि वयं प्रकृतिं च हिमालयं च रक्षितुं शक्नुम इति सः अभिहितवान्। एकता रावत, स्कॉलर्स् अकादमी प्रधानाचार्या च, प्रशान्तः कुकरेति, ज्ञानवृक्ष-विद्यालयस्य निर्देशकश्च, प्रकृतिसंरक्षणस्य, हिमालयस्य, चिरकालं पर्वतेषु भवन्तः भूक्षरणप्रश्नश्च विषये जागरणं कृतवन्तः।
कार्यक्रमस्य अन्ते सर्वैः गिरीशतिवारी गिर्दस्य पङ्क्तयः सामूहिकरूपेण गीतवन्तः
*–उत्तराखण्डो मम मातृभूमिः।*
*मम मातृभूमिः, मम पितृभूमिः।*
*हे भूमे, ते जयजयकारः, मम हिमालयः।*
*केशरमुकुटे ते उज्ज्वलिते।*
*गङ्गायाः धारा अपि प्रकाशते।*
*मम हिमालयः।*
*हिमालयस्य ते जयजयकारः। मम हिमालयः॥*
कार्यक्रमस्य संचालनं ई-टेक्नो माइण्ड संस्थापकः अजयजोशी इत्यनेन कृतम्। अस्मिन् अवसरे मितेश्वरानन्दः (सहायक-आयुक्तः, जी.एस्.टी. कोटद्वारम्), एकता रावतः (प्रधानाचार्या, स्कॉलर्स् अकादमी), प्रशान्तः कुकरेति (संस्थापकः, ज्ञानवृक्षः), शिवं नेगी (अध्यक्षः, ग्रीन-आर्मी-उत्तराखण्डः), उत्कर्षः नेगी (महासचिवः), स्वयंसेवकाः सुशान्तः कोहली, अभयजुयालः, पत्रकारः अम्बेशपन्तः (डिस्कवर-उत्तराखण्ड 24), "ई-टेक्नो माइण्ड" इत्यतः समस्तसहायकाः, बालकाः, अभिभावकाः च उपस्थिताः आसन्।

# "महानः डिजिटलकः अपहारः! सर्वं मुक्तमेव गतम्..."



**हिमसंस्कृतवार्ताः- कुणाल पाण्डेयः मोतिहारी।**
१० सितम्बरतमे दिने जी. डी. गोयनका पब्लिक विद्यालयस्य मोतिहारीस्थिताः प्रतिभाशालिनः छात्राः सीबीएसई– पहलः 'सायबर सुरक्षितभारतम्' इत्यस्याः अन्तर्गतं गान्धीमेदाने शक्तिशालिनं नुक्कडनाटकं प्रस्तुतवन्तः। हास्येन, नाट्येन, प्रभावशालीकथनशैल्या च युक्ते अस्मिन् नाटके विद्यार्थिनः डिजिटलगोपनीयतायाः महत्त्वं प्रकाश्य जनमानसि जागरूकतां वितरितवन्तः।दुर्बलः गुप्तशब्दः, अपहर्तॄणां जालानि, सार्वजनिक- वाई फाई- जालस्य संकटानि, सामाजिकमाध्यमेषु अत्यधिकं विवरणस्य प्रकाशनं च। एतानि सर्वाणि अपायकारिणि इति दर्शयित्वा जनान् सचेतनान् कृतवन्तः।

## मुख्यसन्देशाः-

•गोपनीयता एव शक्तिः। क्लिक करणात् पूर्वं चिन्तयतु।
•वञ्चका' सर्वदा पश्यन्ति, सुलभं मार्गं न ददातु।
गान्धीप्रांगणे विशालः जनसमूहः संजातः। सर्ववयस्काः दर्शकाः नाटकेन आकर्षिताः, हृदयेन स्पृष्टाः च आसन्। सर्वे जनाः विद्यार्थिनां परिश्रमस्य प्रशंसां कृत्वा, सायबर–सुरक्षायाः विषये जागरूकतां प्राप्तवन्तः। एषः कार्यक्रमः न केवलं नाट्यप्रस्तुतिरेव, अपि तु सायबर–सुरक्षितभारतस्य आन्दोलनम् अभवत्।

# "गिल्बर्ट-मत्स्यः"



**हिमसंस्कृतवार्ताः-शास्त्री अधरः, उत्कलप्रदेशः।**
केवलम् अभियन्तारः एव अवगन्तुं शक्नुवन्ति।
एकः मत्स्यः यस्य मिशनः अस्ति! मिलतु गिल्बर्ट- सूक्ष्मप्लास्टिकस्य युद्धे शिरः पूर्वगतं कुर्वन् रोबोट मत्स्यः!
"सुरे विश्वविद्यालय- इत्यस्य एकेन तेजस्वीछात्रेण एलेनोर मैकिन्टोशेण निर्मितः गिल्बर्टः मत्स्यः। गिल्बर्टमत्स्यः मुखस्य सूक्ष्मजालस्य उपयोगेन हानिकारकप्लास्टिककणान् छानयन् वास्तविकमत्स्यवत् तरति। न जालम्, न प्रदूषणं केवलं स्वच्छं, चतुरं प्रारूपम्। एषः जैव-प्रेरितः बॉट पूर्णतया स्वायत्तः अस्ति। द्रुतगामी, पङ्क्षप्रकाश्चास्ति। परन्तु तस्मात् अधिकं, युवानां नेतृत्वे नवीनता अस्माकं ग्रहस्य चिकित्सायां कथं साहाय्यं कर्तुं शक्नोति इति प्रतीकम् अस्ति। छात्रपरियोजनातः जलवायुसमाधानपर्यन्तम्। लघुतरणकाः अपि बृहत्तरङ्गं कर्तुं शक्नुवन्ति इति गिल्बर्ट सिद्धयति।

# संगणक-विषयक-शब्दावली

(०१) ID - परिचयपत्रम्
(०२) Data – टंकितांशः
(०३) Edit – सम्पादनम्
(०४) Keyboard – कुञ्चिपटलम्
(०५) Timeline – समयरेखा
(०६) Login – प्रवेशः
(०७) Share - वितरणम्, प्रसारणम्
(०८) Laptop – अंकसंगणकम्
(०९) Search - अन्वेषणम्
(१०) Default - पूर्वनिविष्ठम्
(११) Input – निवेशः
(१२) Output - फलितम्
(१३) Block – अवरोधः
(१४) Display – प्रदर्शनम् / विन्यासः
(१५) Wallpaper - भित्तिचित्रम्
(१६) Theme – विषयवस्तुः
(१७) User – उपभोक्ता
(१८) Smart phone - कुशलदूरवाणी
(१९) Tag - चिह्नम्
(२०) Setup – प्रतिष्ठितम्
(२१) Install - प्रस्थापना / प्रतिस्थापनम्
(२२) Privacy - गोपनीयता
(२३) Manual – हस्तक्रिया
(२४) Accessibility - अभिगम्यता
(२५) Error – त्रुटिः
(२६) Password – गूढशब्दः
(२७) Code no. - कूटसंख्या
(२८) Pen drive - स्मृतिशलाका

**संकलितम्.....सुधा साठ्ये, मुंबई**
sudha_sathaye@yahoo.com

# हास्यकणिका



*-डॉ. विदुषी अग्रवाल*

**अनुस्वारः किम् अस्ति?**
**संस्कृतकक्षायां प्रथमदिवसे-** गुरुजी कृष्णफलके अलिखत्- "संस्कृतं पठतु"। एका संस्कारीबालिका पृष्टवती- गुरुजी बिन्दी किमर्थम्?
**गुरुजी**- बिन्दी नास्ति, अनुस्वारः अस्ति।
संस्कारीबालिका- मनसि संशयः धृत्वा गृहं गतवती। गृहम् आगत्य, पितृव्यायाः ललाटस्य उपरि विशालं रक्तवर्णीयम् अनुस्वारं दृष्टवा पृष्टवती- किमर्थं विशालः रक्तवर्णीयः अनुस्वारः स्वकीय ललाटे धारितवती?
**पितृव्या-** अनुस्वारः नास्ति संस्कारीबालिका, पितृव्यः अस्ति।
संस्कारीबालिकायाः मनसि अधिकाः भ्रमाः उत्पन्नाः अभवत्।
भ्रातृजायां पृष्टवती- पितृव्यः किमर्थं भवत्याः ललाटे अस्ति?
**भ्रातृजाया**- न न, पितृव्यः नास्ति, भवत्याः भ्राता अस्ति।
संस्कारीबालिका मनसि विस्मयं धृत्वा स्नानगृहम् आगत्य नलिकायाः उपरि अनुस्वारं, दर्पणस्य उपरि भ्रातरम् एवं इष्टिकायाः (Tile) उपरि पितृव्यं दृष्टवा मूर्च्छिता अभवत्। 😅😂🤣😁